योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ३७

सप्तत्रिंशः सर्गः ३७

श्रीवसिष्ठ उवाच ।

इति संचिन्तयन्नेव प्रह्लादः परवीरहा ।

निर्विकल्पपरानन्दसमाधिं समुपाययौ ।। १

निर्विकल्पसमाधिस्थश्चित्रार्पित इवाचलः ।

शैलादिव समुत्कीर्णो बभौ स्वपदमास्थितः ।। २

तथानुतिष्ठतस्तस्य कालो बहुतरो ययौ ।

स्वगृहे भुवनस्थस्य मेरोरिव सुरद्विषः ।। ३

बोधितोऽप्यसुराधीशैर्नाबुध्यत महामतिः ।

अकाले बहुसेकोऽपि बीजकोशादिवाङ्कुरः ।। ४ ।

एवं वर्षसहस्राणि पीनात्माऽतिष्ठदेकदृक् ।

शान्त एवासुरपुरे मार्तण्ड इव चोपले ।। ५

परानन्ददशैकान्तपरिणामितया तया ।

निरानन्दं पराभासमिवाभासपदं गतः ।। ६

एतावताथ कालेन तद्रसातलमण्डलम् ।

बभूवाराजकं तीक्ष्णं मात्स्यन्यायकदर्थितम् ।। ७

हिरण्यकशिपौ क्षीणे समाधौ तत्सुते स्थिते ।

न बभूवापरः कश्चिद्राजा दनुसुतालये ।। ८

असुरेशार्थिनां तेषां दानवानां समाधितः ।

परेणापि प्रयत्नेन प्रह्लादो न व्यबुध्यत ।। ९

न प्रापुर्विकसद्रूपं पतिं तममरारयः ।

लसत्पत्रलताजालं निशि पद्ममिवालयः ।। १०

संविद्वादो न तस्यान्तरबोध्यत विचेतसः ।

भुवश्चेष्टाक्रम इव पौरुषो गतभास्वतः ।। ११

अथोद्विग्नेषु दैत्येषु गतेष्वभिमतां दिशम् ।

विचरत्सु यथाकाममराजनि पुरे पुरा ।। १२

चिराय पातालमभूदभूपालतया तया ।

मात्स्यन्यायविपर्यस्तमस्तंगतगुणक्रमम् ।। १३

बलिमुक्ताबलपुरं मर्यादाक्रमवर्जितम् ।

सर्वार्तशेषवनितं परस्परहृताम्बरम् ।। १४

प्रलापाक्रन्दपुरुषं विसंस्थानपुरान्तरम् ।

लुठदुद्यानननगरं व्यर्थानर्थकदर्थितम्।। १५

चिन्तापरासुरगणं निरन्नफलबान्धवम् ।

अकाण्डोत्पातविवशं ध्वस्ताशामुखमण्डलम् ।। १९

सुरार्भकपराभूतं भूतैराक्रान्तमन्त्यजैः ।

भूतरिक्तमलक्ष्मीकमुच्छिन्नप्रायकोटरम् ।। १७

अनियतवनितार्थमन्त्रयुद्धं

हृतधनदारविरावितं समन्तात् ।

कलियुगसमयोद्भटोत्कटाभं

तदसुरमण्डलमाकुलं बभूव ।। १८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे असुरमण्डलव्याकुलीभवनं नाम सप्तत्रिंशः सर्गः ।। ३७ ।।